# श्री शारदा भुजंग प्रयाताष्टकं

सुवक्षोजकुंभां सुधापूर्णकुंभां
प्रसादावलंबां प्रपुण्यावलंबाम् ।
सदास्येंदुबिंबां सदानोष्ठबिंबां
भजे शारदांबामजस्रं मदंबाम् ॥ 1

कटाक्षे दयार्द्रां करे ज्ञानमुद्रां
कलाभिर्विनिद्रां कलापैः सुभद्राम् ।
पुरस्त्रीं विनिद्रां पुरस्तुंगभद्रां
भजे शारदांबामजस्रं मदंबाम् ॥ 2

ललामांकफालां लसद्गानलोलां
स्वभक्तैकपालां यशःश्रीकपोलाम् ।
करे त्वक्षमालां कनत्प्रत्नलोलां
भजे शारदांबामजस्रं मदंबाम् ॥ 3

सुसीमन्तवेणीं दृशा निर्जितैणीं
रमत्कीरवाणीं नमद्वज्रपाणीम् ।
सुधामंथरास्यां मुदा चिंत्यवेणीं
भजे शारदांबामजस्रं मदंबाम् ॥ 4

© 2022 Vedam Nadam

सुशांतां सुदेहां दृगन्ते कचांतां
लसत्सल्लतांगीमनंतामचिन्त्याम् ।
स्मृतां तापसैः सर्गपूर्वस्थितां तां
भजे शारदांबामजस्रं मदंबाम् ॥ 5

कुरंगे तुरंगे मृगेंद्रे खगेंद्रे
मराले मदेभे महोक्षेऽधिरूढाम् ।
महत्यां नवम्यां सदा सामरूपां
भजे शारदांबामजस्रं मदंबाम् ॥ 6

ज्वलत्कांतिवह्निं जगन्मोहनांगीं
भजे मानसांभोज सुभ्रांतभृंगीम् ।
निजस्तोत्रसंगीतनृत्यप्रभांगीम्
भजे शारदांबामजस्रं मदंबाम् ॥ 7

भवांभोजनेत्राजसंपूज्यमानां
लसन्मंदहासप्रभावक्त्रचिह्नाम् ।
चलच्चंचलाचारूताटंककर्णां
भजे शारदांबामजस्रं मदंबाम् ॥ 8

॥ इति श्रीमच्छङ्करभगवतः कृतौ
श्री शारदा भुजंग प्रयाताष्टकं संपूर्णम् ॥

© 2022 Vedam Nadam